श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्री अय्या देवनाथ तातदेशिकन् विरचितं

# ॥ श्री जम्बूपुरनिवास श्रीनिवासस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री जम्बूपुरनिवास श्रीनिवासस्तोत्रम् ॥

श्रीनिवासाय महते पुरुषाय नमो नमः।
यतः सर्वमिदं जातं स्थितमन्ते प्रलीयते ॥ 1 ॥

सरसि सरसिजार्थं न्यस्तपादे गजेन्द्रे
    ग्रसति महति नक्रे घुष्यमाणे निदाने।
सपदि गरुडवेगात् यस्तमेत्याभ्यरक्षत्
    स हरिरवितुमस्मान् जम्बुधाम्न्याविरासीत् ॥ 2 ॥

स हरिरुरसि लक्ष्मीं हस्तयोः शङ्खचक्रे
    करमधिकटि वामं दक्षिणे दानमुद्राम्।
तदधिकमनोज्ञः त्रातुमद्यापि तिष्ठन्
    भव शरणमिहेति प्रार्थनां प्रेक्षते नः ॥ 3 ॥

तदुषसि निजतल्पादुत्थितैराशु सर्वैः
    सरसि विहितसान्ध्यैरालयं तस्य गत्वा।
परिगतिनतिपूर्वं प्रार्थ्यतां तत्तदिष्टम्
    तदनु स वितरेद्वः सर्वमिष्टं वदान्यः ॥ 4 ॥

सकृदुदितमेतत् हृद्यपद्यत्रयं यः
    पठति स शमिताद्यः त्यक्तरागस्त्रिवर्गे।
स्वकृतसुकृतभूम्ना साभिलाषोऽपवर्गे
    परमपुरुषभक्त्या प्राप्नुयात् ब्रह्मलोकम् ॥ 5 ॥

इति महदुपसत्त्या जातया तत्त्वमत्या
    परमहितमवोचत् सङ्ग्रहं देवनाथः।
स्वमहिमकथनेनानेन सर्वान्तरात्मा
    विमलगुणपयोधिः प्रीयतां श्रीनिवासः॥ **6** ॥

॥ श्री जम्बूपुरनिवास श्रीनिवासस्तोत्रं समाप्तम्॥